# A-I/1/22ASHS1CCTC1/23

**प्रथमसत्रार्द्धः**

**प्रथमपत्रम् (DSCC-16)**

**साहित्यम्**

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

**खण्डः – क**

**केचन दश प्रश्ना एव समाधेयाः।** **10 (प्रश्नः) × 02 (अङ्कः) = 20**

1. प्रपन्नार्तिच्छिदः के ?
2. ध्वन्यालोके कति उद्योताः सन्ति ?
3. ध्वनिशब्दस्य पञ्च अर्थाः के ?
4. व्यङ्ग्यार्थाः कतिविधाः ?
5. अभाववादिनां कति विकल्पाः संभवन्ति ?
6. उपमादिभिः प्रकारैः कोऽर्थो व्याकृतः ?
7. आदिकविः कः ?
8. मुख्यवृत्तिः का ?
9. कीदृशः शोकः श्लोकत्वमागतः ?
10. अपह्नुतिदीपकयोः कस्यार्थस्य प्राधान्यं कस्यार्थस्य चानुयायित्वं प्रसिद्धम् ?
11. महाकविना कौ शब्दार्थौ प्रत्यभिज्ञौ ?
12. कस्यार्थस्य प्रतिपद् वाच्यार्थपूर्विका भवति ?
13. ध्वनिलक्षणे शब्दस्य विशेषणं किम् ?

**खण्डः – ख**

**केचन चत्वारः प्रश्ना एव समाधेयाः।** **04 (प्रश्नः) × 05 (अङ्कः) = 20**

14. ध्वनेः अभाववादिनां मतत्रयस्य सारं लिखत।
15. "काव्यस्यात्मा ध्वनिः" अस्य अभिप्रायं प्रकटयत।

16. भ्रम धार्मिक विश्रब्धः............इत्यादिसम्पूर्णं पद्यं विलिख्य वाच्यव्यङ्ग्ययोः निर्देशं कुरुत।

17. "निमित्तनिमित्तिभावे चायमेव न्याय" इति व्याख्यात।

18. विवक्षितान्यपरवाच्यस्य ध्वनेः सोदाहरणं लक्षणं लिखत।

19. "ते च श्रूयमाणेषु वर्णेषु ध्वनिरिति व्यवहरन्ति" इत्यस्य भावं प्रकटयत।

## खण्डः – ग

**द्वौ प्रश्नौ एव समाधेयौ।** **02 (प्रश्नः) × 10 (अङ्कः) = 20**

20. अलङ्कारशास्त्रे आनन्दवर्धनस्य अवदानं वर्णयत।

21. समासोक्त्यादौ ध्वनेः नान्तर्भावं यथाग्रन्थं साधयत।

22. वाच्यप्रतीयमानयोः अर्थयोः भिन्नसामग्रीवेद्यत्वं विस्तरेण प्रतिपादयत।

# A-I/2/22ASHS1CCTC2/23

## प्रथमसत्रार्द्धः

## द्वितीयपत्रम् (DSCC-17)

## साहित्यम्

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

### खण्डः – क

**केचन दश प्रश्ना एव समाधेयाः।** **10 (प्रश्नः) × 02 (अङ्कः) = 20**

1. अर्थान्तरसंक्रमितवाच्यध्वनेः उदाहरणं किम्?
2. लक्षणामूलाध्वनेः अपरं नाम किम्?
3. गुणस्य लक्षणं किम्?
4. अनुप्रासः कथं न शृङ्गाररसप्रकाशकः?
5. रसादयः कस्य ध्वनेः प्रकाराः?
6. माधुर्यं केषु रसेषु प्रकर्षवत्?
7. "अङ्कुरितः पल्लवितः" इति पद्ये कः ध्वनिः?
8. "अलक्ष्यक्रमव्यङ्ग्यध्वनिः" इत्यत्र अलक्ष्यपदस्य कोऽभिप्रायः?
9. ध्वन्यात्मनि शृङ्गारे कीदृशाः दोषाः हेयाः?
10. संलक्ष्यक्रमव्यङ्ग्यध्वनिः कतिविधः?
11. "तस्या विनापि हारेण" इति पद्ये कीदृशः श्लेषालंकारः?
12. अलङ्काराः कदा परां छायां यान्ति?
13. कः ध्वनिः शब्दव्यापारं विनैव अर्थान्तरमभिव्यनक्ति?

### खण्डः – ख

**केचन चत्वारः प्रश्ना एव समाधेयाः।** **04 (प्रश्नः) × 05 (अङ्कः) = 20**

14. रसभावादितात्पर्यमाश्रित्य विनिवेशनम्।

    अलङ्कृतीनां सर्वासामलङ्कारत्वसाधनम्॥ –कारिकामिमां व्याख्यात।

15. गुणस्य लक्षणं विलिख्य व्याख्यात।

16. अत्यन्ततिरस्कृतवाच्यध्वनिं सोदाहरणं निरूपयत।

17. "ध्वन्यात्मन्येव शृङ्गारे ते हेयाः इत्युदाहृताः" सप्रसङ्गं व्याख्यात।

18. शब्दशक्त्युद्भवध्वनेः सोदाहरणं लक्षणं लिखत।

19. अर्थशक्त्युद्भवध्वनेः सोदाहरणं लक्षणं लिखत।

**खण्डः – ग**

**द्वौ प्रश्नौ एव समाधेयौ।** **02 (प्रश्नः) × 10 (अङ्कः) = 20**

20. "यत्र शब्दशक्त्या साक्षात् अलङ्कारान्तरं वाच्यं सत् प्रतिभासते स सर्वः श्लेषविषयः इति सविस्तरं व्याख्यात।

21. वाच्यवाचकचारुत्वहेतूनां विविधात्मनाम्।
रसादिपरता यत्र स ध्वनेर्विषयो मतः॥ –इति कारिकामिमां व्याख्यात।

22. व्यज्यन्ते वस्तुमात्रेण यदालङ्कृतयस्तदा
ध्रुवं ध्वन्यङ्गता तासां काव्यवृत्तिः तदाश्रयात्॥ –कारिकामिमां व्याख्यात।

# A-I/3/22ASHS1CCTC3/23

**प्रथमसत्रार्द्धः**

**तृतीयपत्रम् (DSCC-18)**

**साहित्यम्**

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

**खण्डः – क**

**केचन दश प्रश्ना एव समाधेयाः।** **10 (प्रश्नः) × 02 (अङ्कः) = 20**

1. 'भारती कवेर्जयति' अत्र जयति पदेन किं व्यज्यते?
2. 'नवरसरुचिराम्' इति कस्याः विशेषणं वर्तते।
3. काव्यलक्षणे 'पुनः क्वापि' इत्यस्याभिप्रायः कः?
4. अवरम् इति शब्दस्यार्थः कः?
5. 'वाच्य एव वाक्यार्थ' इति केषां सिद्धान्तो वर्तते?
6. 'कर्मणि कुशलः' इत्यत्र मम्मटानुसारेण कुशलशब्दस्य मुख्यार्थः कः?
7. 'स्थाणुं भज भवच्छिदे' इत्यत्र स्थाणुशब्द अभिधया कस्मिन्नर्थे नियन्त्रितो भवति?
8. भरतमुनेः रससूत्रं किम्?
9. उपचारमिश्रिता लक्षणा का?
10. निर्वेदः कस्य रसस्य स्थायिभावः?
11. गुणीभूतव्यङ्ग्यस्य कति भेदाः सन्ति?
12. "तथाभूतां दृष्ट्वा नृपसदसि..." इति कस्योदाहरणमस्ति?
13. उपाधिः कतिविधः?

**खण्डः – ख**

**केचन चत्वारः प्रश्ना एव समाधेयाः।** **04 (प्रश्नः) × 05 (अङ्कः) = 20**

14. "कान्तासम्मिततयोपदेशयुजे" इति प्रतिपादयत।
15. मम्मटोक्तं काव्यकारणं निरूपयत।

16. “तात्पर्यार्थोऽपि केषुचित्” इत्यस्य व्याख्या कार्या।
17. “हेत्वभावान्न लक्षणा” इत्यस्य भावार्थं लिखत।
18. अभिहितान्वयवादिमतं निरूपयत।
19. “अपराङ्गव्यङ्ग्यनामकं गुणीभूतव्यङ्ग्यं” सोदाहरणं निरूपयत।

**खण्डः – ग**

**द्वौ प्रश्नौ एव समाधेयौ।** **02 (प्रश्नः) × 10 (अङ्कः) = 20**

20. लक्षणायाः सोदाहरणं लक्षणं लिखत।
21. मम्मटस्य रसलक्षणं विलिख्य भट्टनायकसिद्धान्तमुपस्थापयत।
22. अभिधामूलव्यञ्जनायाः सोदाहरणं लक्षणं लिखत।

# A-I/4/22ASHS1CCTC4/23

## प्रथमसत्रार्द्धः

## चतुर्थपत्रम् (DSCC-19)

## साहित्यम्

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

### खण्डः – क

**केचन दश प्रश्ना एव समाधेयाः।** **10 (प्रश्नः) × 02 (अङ्कः) = 20**

1. नाट्यशास्त्रस्य उपदेष्टा कः?
2. कस्मिन् द्वीपे देवदानवादयः समाक्रान्ताः आसन्?
3. प्रेक्षागृहाणि कतिविधानि? कानि च तानि?
4. अथर्ववेदस्योपवेदः कः?
5. के परस्परं भावयन्ति?
6. रौद्रात् कः रसः जायते?
7. भयानकरसस्य कः स्थायिभावः?
8. विकारभावाः प्रकृतिभावाश्च के?
9. कतिविधाः वीररसाः के च ते?
10. किम् आसाद्य शान्ताद् भावः प्रवर्तते?
11. बीभत्सरसस्य वर्णः कः?
12. काः ताः नाट्यवृत्तयः?
13. अष्टौ सात्त्विकभावाः के?

### खण्डः – ख

**केचन चत्वारः प्रश्ना एव समाधेयाः।** **04 (प्रश्नः) × 05 (अङ्कः) = 20**

14. सञ्चारिभावान् विमृशत।
15. रसानां भावानाञ्च परस्परं सम्बन्धमुल्लिखत?

16. प्रेक्षागृहपरिचयः अधीतग्रन्थदिशा विवेचनीयः।
17. अद्भुतरसं विवेचयत।
18. शृङ्गाररसं यथाग्रन्थं विशदयत।
19. कारिकायाः लक्षणं विलिख्य व्याख्यात।

**खण्डः – ग**

**द्वौ प्रश्नौ एव समाधेयौ।** **02 (प्रश्नः) × 10 (अङ्कः) = 20**

20. नाट्यशास्त्रकर्तुः परिचयं लिखत।
21. सप्रयोजनं नाट्योत्पत्तिं यथाग्रन्थं विचारयत।
22. स्वं स्वं निमित्तमासाद्य शान्ताद् भावः प्रवर्तते इति व्याख्यात।